कञ्चिका, स्त्री, (कञ्चते वेणौ प्रकाशते। कचि+ण्वुल् स्त्रियां टाप् इत्वञ्च।) वेणुशाखा। कञ्ची इति भाषा। तत्पर्य्यायः। कुञ्चिका २ एषणुः ३। इति शब्दचन्द्रिका। क्षुद्रस्फोटः। इति वैद्यकम्॥

कञ्चुकः, पुं, (कञ्चते आपुच्छात् सफणमुखपर्य्यन्तं अभितो दीप्यते प्रकाशते शोभते वा कञ्चते आवृणोति शत्रुनिक्षिप्तशस्त्रादिनिवारणाय। कचि +बाहुलकादुकन्।) सर्पत्वक्। सापेर खोलोस इति भाषा। तत्पर्य्यायः। निर्म्मोकः २।
(यथा पञ्चतन्त्रे। १। ६९।
"भोगिनः कञ्चुकाविष्टाः कुटिलाः क्रूरचेष्टिताः।
सुदुष्टा मन्त्रसाध्याश्च राजानः पन्नगा इव" ।)
भटादेश्चोलाकृतिसन्नाहः। साँजोया इति भाषा। तत्पर्य्यायः। वारवाणः २ बाणवारः ३। इत्यमरभरतौ॥ (तथा हि रामायणे ६। ९९। २३।
"कञ्चुकोष्णीषिणस्तत्र वेत्रझर्झरपाणयः।
उत्सारयन्तः सहसा समन्तात्परिचक्रमुः" ॥)
चोलकम्। काँचलि इति भाषा। तत्पर्य्यायः। चोलः २ कञ्चुलिका ३ कूर्पासकः ४ अङ्गिका ५। वर्द्धापकग्टहीताङ्गस्थितवस्त्रम्। इति हेमचन्द्रः॥ (यथाऽमरुशतके ८२।
"सख्यः किं करवाणि यान्ति
शतधा यत् कञ्चुके सन्धयः" ।)
वस्त्रम्। इत्युणादिकोषः॥ (यथा भागवते ८।७।१५।
"देवांश्च तच्छ्वासशिखाहतप्रभान्
धूम्राम्बरस्रग्वरकञ्चुकाननान्" ॥)

कञ्चुकालुः, पुं, (कञ्चुकोऽस्त्यस्य। कञ्चुक+आलुच्।) सर्पः। इति शब्दचन्द्रिका॥

कञ्चुकी, [न्] पुं, (कञ्चुकोऽस्यास्तीति। कञ्चुक+अस्त्यर्थे इनिः।) महल्लरक्षकः। अन्तःपुराध्यक्षः। स तु बहिःसञ्चरन्तीनां पुरस्त्रीणां प्रेक्षकपुरुषान्तरवारणाय राज्ञा स्त्र्यागारे यो वेत्रधरो नियुक्तः। तत्पर्य्यायः। सौविदल्लः २ स्थापत्यः ३ सौविदः ४। इत्यमरः॥ २।८।८॥ (यथा रत्नावलीनाटिकायां २ अङ्के।
"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपामन्तःकञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः"॥
अस्य लक्षणमुक्तं भरतेन।
"अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः।
सर्व्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते" ॥)
यवः। चणकः। सर्पः। इति राजनिर्घण्टः॥ विड्गः। जोङ्गकद्रुमः। इति मेदिनी॥

कञ्चुकी, स्त्री, (कञ्चयति शरीरकान्त्यादिकं प्रकाशयति रोगादिकमुपशमयति वा। कञ्च णिच् बाहुलकादुकन् गौरादित्वात् ङीष् जातिवाचकत्वात् ङीप् वा।) ओषधिभेदः। इति मेदिनी॥ क्षीरीशवृक्षः। इति रत्नमाला॥

कञ्चुलिका, स्त्री, (कञ्चते हृदयाद्यङ्गान्यावृणोतीति। कचि+उलच्+स्वार्थे कन् गौरादित्वात् ङीष् ह्रस्वः। टाप् च।) कञ्चुकः। स्त्रीणामङ्गरक्षिणी। इति हेमचन्द्रः॥ काँचुलि इति भाषा॥
(यथा अमरुशतके। २३। "त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीम्।)

कञ्जं, क्ली, (कम् क्षीरोदधौ जायते सागरस्यापि जलमयत्वात् तद्गति इति सूच्यते। कम् जले जातम्। जनेः कर्त्तरि डः।) अमृतम्। पद्मम्। इति मेदिनी॥ (यथा, भागवते। ८। ६। ३।
"विरिञ्चो भगवान् दृष्ट्वा सह शर्व्वेण तां तनुम्।
स्वच्छामरकतश्यामां कञ्जगर्भारुणेक्षणाम्" ॥)

कञ्जः, पुं, (कम् के जले शिरसि च जायते। जनेर्डः।) ब्रह्मा। केशः। इति मेदिनी॥

कञ्जकः, पुं, (कञ्जते मनुष्यवत् प्रायेणोच्चारयितुं शक्नोतीति। कजि+कर्त्तरि ण्वुल्।) पक्षिविशेषः। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जजः, पुं, (कञ्जात् विष्णोर्नाभिपद्मात् जातः। जन+कर्त्तरि डः।) ब्रह्मा। इति शब्दरत्नावली॥

कञ्जनः, पुं, (कं सुखं जनयतीति। कम्+जनि+अण्।) कन्दर्पः। इति त्रिकाण्डशेषः॥ पक्षिविशेषः। इति शब्दचन्द्रिका। मयना इति भाषा॥

कञ्जरः, पुं, (कं जलं एकार्णवस्थसलिलं जरयति शोषयति। कम् जृणाति रश्मिभिराकर्षति। कजि+अरन्।) ब्रह्मा। सूर्य्यः। उदरम्। हस्ती। इत्युणादिकोषः॥

कञ्जलः, पुं, (कञ्जते उपदिष्टविषयं पठितुं शक्नोति। कजि+कलच्।) मदनपक्षी। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जारः, पुं, (कम् जलं भुक्तरसादिकं जारयति। कम्+जलं जारयति शोषयति रश्मिभिः। कम् एकार्णवस्थप्रलयसलिलं जारयति योगबलेन नाशयति। कं जलं जारयति शोषयति शुण्डेनेतिशेषः। कम्+जॄ+णिच्+अण्। यद्वा "कञ्जिमृजिभ्यां चित्"। इति आरन्। उणां ३।१३७।) जठरम्। सूर्य्यः। विरिञ्चिः। वारणः। मुनिः। इति मेदिनी॥ (मयूरः। व्यञ्जनम्। इत्युणादिकोषः॥ ४।१३७॥ कम् जलं सागरं जारयति शोषयति गण्डूषीकृत्य योगबलेन इति विग्रहे अगस्त्यमुनिः॥)

कञ्जिका, स्त्री, (कञ्जते तरसा भूमिं भित्त्वा उत्पद्यते। कजि+कर्त्तरि+ण्वुल्+टाप् इत्वञ्च।) ब्राह्मणयष्टिकावृक्षः। इति शब्दरत्नावली॥ बामन्हाटी इति भाषा॥

कट गत्यां। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कटति। इति दुर्गादासः॥

कट इ गत्यां। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्। इ-कण्ट्यते। इति दुर्गादासः॥

कट ई गत्यां। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। कटति अकटीत् अकाटीत् चकाट। ई कट्टः इति दुर्गादासः॥

कट ए वृतौ। वृषि। वृतिरावरणम्। वृट् वर्षणम्। (भ्वां-परं-सकं-अकं च सेट्।) कटति। एदित् अकटीत् चकाट।) ए अकटीत् पटो गात्रम्। कटति मेघः। इति दुर्गादासः॥

कटः, पुं, (कटति मदवारि वर्षति यः। कट वर्षणे-कर्त्तर्य्यच्।) हस्तिगण्डस्थलम्। "कण्डूयमानेन कटं कदाचित् वन्यद्विपेनोन्मथिता त्वगस्य"। इति रघुः"। २। ३७।) कटिदेशः तत्पार्श्वश्च। किलिञ्जकः। इत्यमरः॥ माँदुर् दरमा इत्यादि भाषा। काशादिरचितरज्जुः येन कुसूलं वेष्ट्यते। कुसूलस्य मराथि इति टीकान्तरम्॥ तृणरचितटाटी इतिख्यात इत्यन्ये। इति तट्टीकायां भरतः॥
(यथा भागवते। १। ३। १८।
"चतुर्द्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्ज्जितम्।
ददार करजैर्वक्षस्येरकां कटकृद्यथा" ॥)
अतिशयः। शरः। समयः। इति मेदिनी॥ तृणम्। इति धरणी॥ (यथा मनु २। २०४।
"गोऽश्वोष्ट्रयानप्रासादस्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च" ॥
"कटेषु तृणादिनिर्म्मितेषु" इति कुल्लूकभट्टः॥)
शवः। शवरथः। ओषधी। श्मशानम्। इति हेमचन्द्रः॥ तक्षितकाष्ठम्। तक्ता इति भाषा। इति शब्दरत्नावली॥ (यथा,—रामायणे। २। ५६। २१।
"तां निष्ठितां बद्धकटां दृष्ट्वा रामः सुदर्शनाम्।
सुश्रूषमाणमेकाग्रमिदं वचनमब्रवीत्" ॥
"बद्धकटां बद्धकवाटाम्" इति तट्टीका॥ स्वनामप्रसिद्धराक्षसः। यथा,—रामायणे। ५। १२। १३।
"शुकनासस्य वक्रस्य कटस्य विकटस्य च।
रक्षसो लोमहर्षस्य दंष्ट्रालस्रस्वकर्णयोः" ॥)

कटः, त्रि, (कटयति प्रकाशयति क्रियामितिशेषः। कट्+णिच्+अच्।) क्रियाकारः। इति हेमचन्द्रः॥

कटकः, पुं क्ली, (कटति वर्षति अस्मिन् मेघ इति। अथवा कट्यते निर्गम्यते अस्मात् निर्झरिण्यादिभिः "कृञादिभ्यः संज्ञायां वुन्"। ५। ३५। उणां इति वुन्।) पर्व्वतमध्यभागः। तत्पर्य्यायः। नितम्बः २। इत्यमरः॥ २। ३। ५॥ मेखला ३ इति भरतः॥ (यथा रघुः। १६। ३१। "मार्गैषिणी सा कटकान्तरेषु वैन्ध्येषु सेना बहुधा विभिन्ना" ॥) वलयः। चक्रम्। इत्यमरः॥ २। ६। १०७। हस्तिदन्तमण्डनम्। सामुद्रलवणम्। राजधानी। इति मेदिनी॥ नगरी। इति शब्दरत्नावली॥ सेना। इति हेमचन्द्रः॥ (यथा हितोपदेशे १। ३३२। "स च दिग्विजयक्रमेणागत्य चन्द्रभागानदीतीरे समावेशितकटको वर्त्तते" ॥) सानुः। पर्व्वतस्य समभूभागः। इति विश्वः॥
("गिरिकूटेषु दुर्गेषु नानाजनपदेषु च।
जनाकीर्णेषु देशेषु कटकेषु परेषु च" ॥
इति महाभारतम् ४। २४। १२।)

कटकी, [न्] पुं, (कटकोऽस्त्यस्य अस्त्यर्थे इनिः।) पर्व्वतः। इति त्रिकाण्डशेषः॥

कटकोलः, पुं, (कटति वर्षति स्रवति इति। कट्+अच्। कटस्य निष्ठीवनरूपजलस्य कोलः घनीभावो यत्र। कुल संस्त्याने अधिकरणे घञ्।) निष्ठीवनपात्रम्। इति त्रिकाण्डशेषः॥ पिक्दानी इति भाषा॥